# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ३** | **गुणाः – ५०** |
| **विषयः – पुराणेतिहासः** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १५/०७/२०२१** | **सन्दर्भग्रन्थः – ब्रह्मवैवर्तपुराणे प्रकृतिखण्डः ६७ अध्यायाः** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ श्रुतं सर्वमपूर्वं च त्वत्प्रसादात्सुधोपमम्।
अधुना प्रकृतीनां च व्यासं वर्जय पूजनम्॥

२ लक्ष्मीं तौ च समाराध्य चोग्रेण तपसा मुने।
प्रत्येकं वरमिष्टं च सम्प्रापतुरभीप्सितम्॥

३ शिवं प्रणम्य शिरसा दानवेन्द्रः प्रतापवान्।
समारुरोह यानं च स्वामात्यैः सह सत्वरम्॥

४ स च कृष्णो द्विधा भूतो द्विभुजस्य चतुर्भुजः।
चतुर्भुजश्च वैकुण्ठे गोलोके द्विभुजः स्वयम्॥

**प्रश्नः २** नारद-नारायणसंवादे सरस्वत्याख्यानसारो यथाग्रन्थं लेखनीयः।

**प्रश्नः ३** धर्मध्वजपुत्री-तुलसी-आख्यानं यथाग्रन्थं विस्तारेण वर्णयत।

**प्रश्नः ४** नारद-नारायणसंवादे गङ्गाख्यानं सविस्तारं यथापुस्तकं वर्णयत।

**प्रश्नः ५** सावित्री-यमदेवसंवादः ग्रन्थानुसारं सविस्तरं विलिख्यताम्।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ प्रयान्ति स्वर्गमन्यं च येन येनैव कर्मणा।
मानवाः पुण्यवन्तश्च तन्मे व्याख्यातुमर्हसि॥

२ हरिसेवां विना साध्वि न लभेत् कर्मखण्डनम्।
शुभकर्म स्वर्गबीजं नरकं च कुकर्मणाम्॥

३ इत्येवमुक्त्वा जीवश्च समालिङ्ग्य सुरेश्वरम् ।
दत्वा शुभाशिषं चेष्टं बोधयामास नारद ॥

४ नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥

**प्रश्नः ७** लक्ष्मीस्वरूपं तदुपासनां तत्पूजनं च वर्णयत ।

**प्रश्नः ८** स्वाहा-स्वधादेवी-आख्यानं यथाग्रन्थं विस्तारेण लिखत ।

**प्रश्नः ९** मनसादेवीसमुत्पत्तिं तदाख्यानं च यथाग्रन्थं विस्तारेण लिखत ।

**प्रश्नः १०** कर्मानुसारं जीवगतिनिरूपणं ग्रन्थानुसारं सविस्तरं क्रियताम् ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ सरस्वतीकवचं केन कस्मै प्रोक्तम् ?
२ प्रकृतिखण्डे कयोः मुख्यसंवादः अस्ति ?
३ पृथ्व्याः पुत्रस्य नाम किमस्ति ?
४ तुलसी कस्य पुत्री ?
५ मानवः श्रीकृष्णनामगुणकीर्तनात् किं किं जयति ?
६ कः कस्मै कवचं दत्तवान् ?
७ तुलस्याः शापात् विष्णुः किं जातः ?
८ वेदमाता का अस्ति ?
९ यमस्य नगरी का ?
१० महालक्ष्मीः इत्यत्र कः समासः कश्च विग्रहः ?
११ दुर्वासाः कं शशाप ?
१२ लक्ष्मीः गृहात् कथं गच्छति ?
१३ स्वाहा केषां भार्या अस्ति ?
१४ पुरा गोलोके किन्नाम्नी गोपी आसीत् ?
१५ दक्षिणा कस्य पत्नी वर्तते ?

****